श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवासनिगमान्त यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीरामभद्र मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामभद्र मङ्गळाशासनम् ॥

शरणागत सन्त्राण निपुणाय महात्मने।
अयोध्याजन भाग्याय रामभद्राय मङ्गळम्॥ १ ॥

कौसल्यानन्द कन्दाय कल्याणगुणसिन्धवे।
शरण्याय वरेण्याय रामभद्राय मङ्गळम्॥ २ ॥

कौशिकाख्य महायोगि सन्देशसफलीकृतौ।
कृतिने नतितुष्टाय रामभद्राय मङ्गळम्॥ ३ ॥

वैदेही वदनाम्भोज लोलंबायितचेतसे।
भद्राणामपि भद्राय रामभद्राय मङ्गळम्॥ ४ ॥

गौतमाश्रम साफल्य निदानपदपांसवे।
दाशकीशादिमित्राय रामभद्राय मङ्गळम्॥ ५ ॥

महापातक निर्मुक्तिहेतु सेतुविधायिने।
शिक्षिताशरजालाय रामभद्राय मङ्गळम्॥ ६ ॥

विभीषण परित्राण संहृष्ट मनसेऽनिशम्।
प्राप्तसीताय रामाय रामभद्राय मङ्गळम्॥ ७ ॥

प्राप्तराज्याय रामाय भरताभीष्टदायिने।
सर्वबन्धुसमेताय रामभद्राय मङ्गळम्॥ ८ ॥

श्रीनिवासयतीन्द्रोक्तं सीतावल्लभ मङ्गळम्।
ये पठन्ति महात्मानः तेषां भूयात् तु मङ्गळम्॥ ९ ॥

॥ इति श्रीरामभद्र मङ्गळाशासनं संपूर्णम् ॥

www.prapatti.com